Sample Lesson for Prarambhik Sanskrit

# पाठ 6 अहं, त्वम् । आवां, वयम् । युवां युयम् ।

### 6.1 अहं, त्वम्

अहं बालक: अस्मि ।

त्वं बालकः असि ।

अहं बालिका अस्मि ।

त्वं बालिका असि ।

अहं प्रभाते स्नानं करोमि ।

त्वं प्रभाते स्नानं करोषि ।

अहं प्रातराशं खादामि ।

त्वं प्रातराशं खादसि ।

अहं मध्याह्ने शालां गच्छामि ।

त्वं मध्याह्ने शालां गच्छसि ।

अहं प्रभाते शालां गच्छामि ।

त्वं प्रभाते शालां गच्छसि ।

अहं सायंकाले खेलामि ।

त्वं सायंकाले खेलसि ।

अहं मध्याह्ने स्वाध्यायं करोमि ।

त्वं मध्याह्ने स्वाध्यायं करोषि ।

अहं रात्रौ निद्रां करोमि ।

त्वं रात्रौ निद्रां करोषि ।

अहं सायंकाले गीतं गायामि ।

त्वं सायंकाले गीतं गायसि ।

---------------------------------------------- भाषाभ्यास: ------------------------------------------------------

अहम् /त्वम् इति शब्दं योजयत ।

1.---------------- खेलामि । 2. -------------- धावसि । 3. ------------ पठसि ।

4.---------------- पश्यामि 5. -------------- कूर्दसि । 6. ----------- हसामि ।

------------------------------------------------------------------------------------------------------------------

### 6.2 आवां, वयम्

आवाम् ( द्वि व .) ,वयम् ( अ . व .)

आवां लिखाव: ।

आवां धावाव: ।

वयं लिखाम: ।

वयं धावाम: ।

**6.3 युवां, यूयम्**

युवाम् ( द्वि व .) , यूयम् ( अ . व .)

त्वं पश्यसि । युवां पश्यथः । यूयं पश्यथ ।

त्वं गच्छसि । युवां गच्छथः । यूयं गच्छथ ।

--------------------------------------------- भाषाभ्यास: ----------------------------------------------------

योग्यं पर्यायं चिनुत लिखत च ।

1. अहम् -------- (खेलामि/ खेलाम:) । 2. ------- क्रीडाम: (अहं/वयं) । 3. वयं ------- (पठसि/ पठाम:)।

4. यूयं ------------(पश्यामि/पश्यथ) । 5. -------- (कूर्दसि)।(अहं/त्वं) 6. -------- हसथ: ।(अहं/युवां)

------------------------------------------------------------------------------------------------------------------

**6.4 भवान् - भवन्तौ - भवन्तः** (पु)

| **ए.व .** | **द्वि व.** | **अ.व .** |
|---|---|---|
| भवान् बालक: | भवन्तौ बालकौ | भवन्त: बालका: |
| भवान् बालक: गच्छति । | भवन्तौ बालकौ गच्छत: । | भवन्त: बालका: गच्छन्ति । |
| भवान् बालक: पठति । | भवन्तौ बालकौ पठत: । | भवन्त: बालका: पठन्ति । |
| भवान् बालक: लिखति । | भवन्तौ बालकौ लिखत: । | भवन्त: बालका: लिखन्ति । |
| भवान् बालक: पिबति । | भवन्तौ बालकौ पिबत: । | भवन्त: बालका: पिबन्ति । |
| भवान् बालक: करोति । | भवन्तौ बालकौ कुरुत: । | भवन्त: बालका: कुर्वन्ति। |

--------------------------------------------- भाषाभ्यास: ----------------------------------------------------

भवान् - भवन्तौ - भवन्त: योजयित्वा पञ्च पञ्च वाक्यानि वदत / लिखत ।

------------------------------------------------------------------------------------------------------------------